स्थादिकं खगोलशब्दे दर्शितम् । तच्चारस्य गुरुवर्षशब्दे २६२१ पृ० तस्य ग्रहत्वप्राप्तिकथा गुरुशब्दे दृश्या ।

**बृहस्पतिचक्र** न० बृहस्पतेः सञ्चारकाले नराकारचक्रस्य मूर्द्धादिषु स्वनक्षत्रस्य पातेन शुभाशुभसूचके चक्रभेदे तच्च ज्यो०त० उक्तं यथा "शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं चैकं कण्ठे विभूतिं मदन-शरमितं वक्षसि प्रीतिवृद्धिम् । पादस्थाः षट् च पीड़ां पुनरपि जलधिर्वामहस्ते च मृत्युं नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमर्क्षात्" ।

**बृहस्पतिपुरोहित** पु० ६ब० १इन्द्रे २देवमात्रे च यजु०२।११

**बृहस्पतिवार** पु० ६त० । जीवाभिपत्ययुक्ते दिने तदानय-नादिकं दिनपशब्दे दृश्यम् ।

**बृहस्पतिसव** पु० यज्ञभेदे "वाजपेयेनेष्ट्वा राजा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन" आश्व० श्रौ० ९ । ९ ।

**बृ(बृ)हस्पतिस्तोम** पु० यज्ञभेदे ताण्ड्य० २५।१।१ ।

**बॄ** वृत्यां भृतौ च क्र्या०वा०पर०सक०सेट् । बृ(बॄ)णाति अबा-रीत् बबार बरि(री)ता बिबरी(रि)षति बुबूर्षति बूर्णः ।

**बेकनाट** पु०बे इत्यपभ्रंशः द्वित्वबोधकः एकं गुणं द्रव्यमृणिकाय दत्त्वा द्विगुणं मह्यं देयमिति समयेन नाटयति व्याहरति नाटि-अच् बे एकशब्दयोः पृषो० बेकभावः । कुसीदिनि ऋ० ८।६६।१० भाष्ये दृश्यम् ।

**बेकुरा** स्त्री वाचि निघण्टुः ।

**बे(वे)ह** प्रयत्ने भ्वा० आत्म० सक० सेट् । बे(वे)हते अबे(वे)हिष्ट बे(वे)हे । ऋदित् चङि न ह्रस्वः ।

**बोकड़ी** स्त्री वस्तान्त्र्यां राजनि० ।

**बोध** पु० बुध-भावे घञ् । १ज्ञाने त्रिका० । २जागरे च ३देवभेदे भा०भी०६अ० । [चके वैतालिके शब्दमा० ।

**बोधक** त्रि० बुध-णिच्-ण्वुल् । १ज्ञानजनके बोधकरे स्तु

**बोधकर** त्रि० बोधं ज्ञानं जागरणं वा करोति कृ-ट । १ज्ञानकारके निशान्ते जागरणकारके२वैतालिके च अमरः

**बोधन** न० बुध-णिच्-ल्युट् । १विज्ञापने कालवशात् गन्धा-देन्युन्नतायां २तदुद्दीपने ३जागरणे च । "शयनं बोधनं हरेः" इति पुराणम् । "सायाह्ने बोधनं कुर्यात्" इति स्मृतिः । देवीबोधनकालादिः ति०त०प्रदर्शितो यथा लिङ्गपुराणम् "कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा । नवम्यां बोधयेद्देवीं महाविभवविस्तरैः" "इषे मासि सिते पक्षे नवम्यामार्द्रयोगतः । श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् । ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च । अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा" इति मन्त्रलिङ्गञ्च । अकाल इति तु रात्रित्वेन दक्षिणायनस्य तथा च श्रुतिः "तपस्तपस्यौ शिशिरावृतुः । मधुश्च माधवश्च वास-न्तिकावृतुः । शुक्रश्च शुचिश्च ग्रैष्मावृतुः । अथैतदुत्त-रायणं देवानां दिनं, नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः । सहाश्च सहस्यश्च हैमन्तिका-वृतुः । अथैतद्दक्षिणायनं देवानां रात्रिः" इति एवञ्च "रात्रावेव महामाया ब्रह्मणा बोधिता पुरा । तथैव च नराः कुर्युः प्रतिसंवत्सरं नृप !" इति अस्यार्थे तद्वि-षयत्वम् । अतएव लिङ्गपुराणे दिवेत्युक्तम् । एवञ्च कालि-कापुराणेऽपि बोधने रात्राविति पदं देवतारात्रिपरम् । ततश्च पूर्वाह्णे नवम्यामार्द्रानक्षत्रयुक्तायां बोधनं पूर्वा-ह्णेतरकाले आर्द्रालाभे नवम्यामार्द्रभे दिवेत्यत्र दिवा-पदात् तत्रापि बोधनम्, अन्यथा दिवापदं व्यर्थं स्यादिति । ज्योतिषार्णवे व्यक्तमुक्तं वराहेण "कन्या-र्द्रमीनपर्य्यन्तं यत्र संप्राप्यते शिवः । तत्र बोधः प्रक-र्त्तव्यो देव्या राज्ञा शुभप्रदः" । शिव आर्द्रा । एवञ्चोभय दिने पूर्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न युग्मात् पूर्वत्र, युग्मबाधकपूर्वाह्णस्य बाधकनक्षत्रा-नुरोधात् दिवानक्षत्रालाभे तु पूर्वाह्ण एव नवम्याम् उभयत्र पूर्वाह्णलाभे तु पूर्वदिन एव युग्मात् । अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च । "माघे वा फाल्गुने वापि भवेद्वै माघसप्तमी । माक-रीति च यत् प्रोक्तं तत् प्रायो वृत्तिदर्शनात्" इति मौ-रागमान्माकरीतिवत् आर्द्रायोगतः इत्यस्य प्रायिक-त्वेनाभिधानं प्रतीयते । ततश्चार्द्रारहितबोधने मन्त्रा-न्तरानुपदेशात् तद्युक्तमन्त्रः प्रमाणयुक्तत्वेन प्रयुज्यते । "यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम् । यद-मेध्यमशुद्धञ्च यातयामञ्च यद्भवेत् । तदोङ्कारप्रयुक्तेन सर्वञ्चाविकलं भवेत्" इति योगियाज्ञवल्क्यवचनात् । षष्ठी बोधनेऽप्येवं नवम्यां बोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनं यथाह भविष्ये "षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत्" । सन्ध्योक्ता वराहमिहिरेण "अ-र्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्" । षष्ठ्यां बोधने तु प्रागुक्तः "ओं रावणस्य वधार्थाय" इति "अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः" इति च पठेत् । अत्र बोधनामन्त्रणयोः पृथक्त्वं तत्-